# 9 - नवम दशकम्

## सृष्टि प्रकार वर्णनम्

स्थितस् स कमलोद्भव तव हि नाभि पङ्केरुहे
कुतस् स्विदिद मम्बुधौ उदितमित्य नालोकयन् ।
तदीक्षण कुतूहलात् प्रतिदिशं विवृत्तानन:
चतुर् वदनता मगात् विकसदष्ट दृष्ट्यम्बुजाम् ॥ ॥9-1॥

महार्णव विघूर्णितं कमल मेव तत्केवलं
विलोक्य तदुपाश्रयं तव तनुं तु नालोकयन् ।
क एष कमलोदरे महति निस्सहायो ह्यहं
कुत: स्विदिद मम्बुजं समजनीति चिन्तामगात् ॥ ॥9-2॥

अमुष्य हि सरोरुह: किमपि कारणं सम्भवेत्
इति स्म कृत-निश्चय: स खलु नाल रन्ध्राध्वना ।
स्व योगबल विद्यया समवरूढवान् प्रौढधी:
त्वदीय मतिमोहनं न तु कलेबरं दृष्टवान् ॥ ॥9-3॥

ततस् सकल नालिका विवर मार्गगो मार्गयन्
प्रयस्य शतवत्सरं किमपि नैव संदृष्टवान् ।
निवृत्य कमलोदरे सुख निषण्ण एकाग्रधी:
समाधि बल मादधे भवदनुग्र हैकाग्रही ॥ ॥9-4॥

शतेन परिवत्सरै: दृढ समाधि बन्धोल् लसत्
प्रबोध विशदीकृत: स खलु पद्मिनी सम्भव: ।
अदृष्ट चर मद्भुतं तव हि रूप मन्तर्दृशा
व्यचष्ट परितुष्ट धी: भुजग भोग भागाश्रयम् ॥ ॥9-5॥

किरीट मुकुटोल्लसत् कटक हार केयूर युक्
मणि स्फुरित मेखलं सुपरिवीत पीताम्बरम् ।
कलाय कुसुम प्रभं गल तलोल् लसत् कौस्तुभं
वपुस् तदयि भावये कमल जन्मने दर्शितम् ॥ ॥9-6॥

श्रुति प्रकर दर्शित प्रचुर वैभव श्रीपते
हरे जय जय प्रभो पदमुपैषि दिष्ट्या दृशोः ।
कुरुष्व धिय माशु मे भुवन निर्मितौ कर्मठाम्
इति द्रुहिण वर्णित स्वगुण बंहिमा पाहि माम् ॥ ॥9-7॥

लभस्व भुवनत्रयी रचन दक्षता मक्षतां
गृहाण मदनुग्रहं कुरु तपश्च भूयो विधे ।
भवत्वखिल साधनी मयि च भक्ति रत्युत्कटेति
उदीर्य गिर मादधाः मुदित चेतसं वेधसम् ॥ ॥9-8॥

शतं कृत तपास् ततः स खलु दिव्य संवत्सरान्
अवाप्य च तपोबलं मतिबलं च पूर्वाधिकम् ।
उदीक्ष्य किल कम्पितं पयसि पङ्कजं वायुना
भवत्बल विजृम्भितः पवन पाथसी पीतवान् ॥ ॥9-9॥

तवैव कृपया पुनः सरसि-जेन तेनैव सः
प्रकल्प्य भुवनत्रयीं प्रववृते प्रजा निर्मितौ ।
तथा विध कृपाभरो गुरु मरुत् पुराधीश्वर
त्वमाशु परिपाहि मां गुरुद योक्षितै रीक्षितैः ॥ ॥9-10॥

॥ सदा सर्वत्र गोविन्द नाम संकीर्तनम् गोविन्दा....गोविन्दा ॥
॥ श्री गुरुवायूरप्पा शरणम् श्री हरये नमः॥